4. शिशुलालनम्

अभ्यासः

प्रश्न 1. एकपदेन उत्तरं लिखत-

(क) कुशलवौ कम् उपसृत्य प्रणमतः?
उत्तराणि:
रामम्

(ख) तपोवनवासिनः कुशस्य मातरं कंन नाम्ना आह्वयन्ति?
उत्तराणि:
देवीति

(ग) वयोऽनुरोधात् कः लालनीयः भवति?
उत्तराणि:
शिशुः

(घ) केन सम्बन्धन वाल्मीकि: लवकुशयो: गुरुः
उत्तराणि:
उपनयनोपदेशन

(ङ) कुत्र लवकुशायाः पितुः नाम न व्यवाहियत?
उत्तराणि:
तपोवने

प्रश्न 2. अधोलिखिताना प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-

(क) रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः कीदृशः आसीत्?
उत्तराणि:
रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः हृदयग्राही आसीत्।

(ख) रामः लवकुशौ कुत्र उपवेशयितुम् कथयति?
उत्तराणि:
रामः लवकुशौ अङ्कम् सिंहासनम् उपवेशयितुम् कथयति।

(ग) बालभावात् हिमकरः कुत्र विराजते?
उत्तराणि:
बालभावात् हिमकरः पशुपति-मस्तके विराजते।

(घ) कुशलवयोः वंशस्य कर्ता क?
उत्तराणि:
कुशलवयोः वंशस्य कर्ता सहनदीधितिः।

(ङ) कुशलवयोः मातरं वाल्मीकि: केन नाम्ना आह्वयति?
उत्तराणि:
कुशलवयोः मातरं वाल्मीकिः वधूः नाम्ना आह्वयति।

प्रश्न 3. रेखाङ्कितेषु पदेषु विभक्तिं तत्कारणं च उदाहरणानुसार निर्दिशत-

	विभक्तिः	**तत्कारणम्**
यथा– राजन्! अलम् अतिदाक्षिण्येन।	तृतीया	'अलम्' योगे
(क) रामः लवकुशौ आसनार्धम् उपवेशयति।	.....	.....
(ख) धिङ् माम् एवं भूतम्।	.....	.....
(ग) अङ्कव्यवहितम् अध्यास्यतां सिंहासनम्।	.....	.....
(घ) अलम् अतिविस्तरेण।	.....	.....
(ङ) राममु उपसृत्य प्रणम्य च।	.....	.....

उत्तराणि:
(क) 'उपवेशयति' इति पदस्य कारणेन द्वितीया विभक्तिः अस्ति।
(ख) "धिङ् (धिक्)' अव्यय कारणेन द्वितीया विभक्तिः अस्ति।
(ग) 'अध्यास्यताम्' इति पदस्य कारणेन द्वितीया विभक्तिः अस्ति।
(घ) 'अलम्' अव्यय कारणेन तृतीया विभक्तिः अस्ति।
(ङ) 'उपसृत्य' इति पदस्य कारणेन द्वितीया विभक्तिः अस्ति।

प्रश्न 4. यथानिर्देशम् उत्तरत-

(क) 'जानाम्यहं तस्य नामधेयम्' अस्मिन् वाक्ये कर्तृपदं किम्?
उत्तराणि:
अहम्

(ख) 'किं कुपिता एवं भणति उत प्रकृतिस्था'-अस्मात् वाक्यात् 'हर्षिता' इति पदस्य विपरीतार्थकपदं चित्वा लिखत।
उत्तराणि:
कुपिता

(ग) विदूषकः (उपसृत्य) 'आज्ञापयतु भवान्!' अत्र 'भवान्' इति पद कस्मै प्रयुक्तम्?
उत्तराणि:
रामाय

(घ) 'तस्मादङ्क-व्यवहितम् अध्यास्याताम् सिंहासनम्'-अत्र क्रियापदं किम्?
उत्तराणि:
अध्यास्याताम्

(ङ) 'वयसस्तु न किञ्चिदन्तरम्'-अत्र 'आयुषः' इत्यर्थे किं पदं प्रयुक्तम्?
उत्तराणि:
वयसः

प्रश्न 5. अधोलिखितानि वाक्यानि कः कं प्रति कथयति-

	कः	कम्
(क) सव्यवधानं न चारित्र्यलोपाय।	.....	.....
(ख) किं कुपिता एवं भणति, उत प्रकृतिस्था?	.....	.....
(ग) जानाम्यहं तस्य नामधेयम्।	.....	.....
(घ) तस्या द्वे नाम्नी।	.....	.....
(ङ) वयस्य! अपूर्वं खलु नामधेयम्।	.....	.....

उत्तराणि:

	कः	कम्
(क) सव्यवधानं च चारित्र्यलोपाय।	रामः	उभौ (कुशलवौ)
(ख) किं कुपिता एवं भणति, उत प्रकृतिस्था?	विदूषकः	कुशम्
(ग) जानाम्यहं तस्य नामधेयम्।	कुशः	रामम्
(घ) तस्या द्वे नाम्नी।	लवः	विदूषकम्
(ङ) वयस्य! अपूर्वं खलु नामधेयम्	रामः	विदूषकम्

प्रश्न 6(अ). मञ्जूषातः पर्यायद्वयं चित्वा पदानां समक्षं लिखत-

शिवः	शिष्टाचारः	शशिः	चन्द्रशेखरः	सुतः	इदानीम्
अधुना	पुत्रः	सूर्यः	सदाचारः	निशाकरः	भानुः

(क) हिमकरः – ....

(ख) सम्प्रति – ....

(ग) समुदाचारः – ....

(घ) पशुपतिः – ....

(ङ) तनयः – ....

(च) सहस्रदीधितिः – ....

उत्तराणि:

(क) शशिः, निशाकरः

(ख) इदानीम्, अधुना

(ग) शिष्टाचारः, सदाचारः

(घ) शिवः, चन्द्रशेखरः

(ङ) पुत्रः, सुतः

(च) सूर्यः, भानुः

प्रश्न 6(आ). विशेषण-विशेष्यपदानि योजयत-

यथा–विशेषण पदानि		विशेष्य पदानि
श्लाघ्या	–	कथा
(1) उदात्तरम्यः		(क) समुदाचारः
(2) अतिदीर्घः		(ख) स्पर्शः
(3) समरूपः		(ग) कुशलवयोः
(4) हृदयग्राही		(घ) प्रवासः
(5) कुमारयोः		(ङ) कुटुम्बवृत्तान्तः

उत्तराणि:

(1) उदात्तरम्यः – (क) समुदाचारः

(2) अतिदीर्घः – (घ) प्रवासः

(3) समरूपः – (ङ) कुटुम्बवृत्तान्तः
(4) हृदयगाही – (ख) स्पर्शः
(5) कुमारयोः – (ग) कुशलवयोः

प्रश्न 7(अ). अधोलिखितपदेषु सन्धि कुरुत-

(क) द्वयोः + अपि – _____
(ख) द्वौ + अपि – _____
(ग) कः + अत्र – _____
(घ) अनभिज्ञः + अहम् – _____
(ङ) इति + आत्मानम् – _____

उत्तराणि:
(क) द्वयोरपि
(ख) द्वावपि
(ग) कोऽत्र
(घ) अनभिज्ञोऽहम्
(ङ) इत्यात्मानम्

प्रश्न 7(आ). अधोलिखितपदेषु विच्छेदं कुरुत-

(क) अहमप्येतयोः – _____
(ख) वयोऽनुरोधात् – _____
(ग) समानाभिजनौ – _____
(घ) खल्वेतत् – _____

उत्तराणि:
(क) अहम् + अपि + एतयो:
(ख) वयः + अनुरोधात्
(ग) समान + अभिजनौ
(घ) खलु + एतत्

योग्यताविस्तारः
यह पाठ संस्कृतवाङ्मय के प्रसिद्ध नाटक 'कुन्दमाला' के पंचम अंक से सम्पादित कर लिया गया है। इसके रचचिता प्रसिद्ध नाटककार दिङ्नाग है। इस नाटकांश मे राम कुश और लव को सिंहासन पर बैठाना चाहते है। किन्तु वे दोनों अतिशालीनतापूर्वक मना करते हैं। सिंहासनारूढ राम कुश

और लव के सौन्दर्य से आकृष्ट होकर उन्हें अपनी गोद में बिठा लेते हैं। और आनन्दित होते हैं। पाठ में शिशु स्नेह का अत्यन्त मनोहारी वर्णन किया गया है।

नाट्य-प्रसङ्गः
कुन्दमाला के लेखक दिङ्नाग ने प्रस्तुत नाटक में रामकथा के करुण अवसाद भरे उत्तरार्ध की नाटकीय सम्भावनाओं को मौलिकता से साकार किया है। इसी कथानक पर प्रसिद्ध नाटककार भवभूति का उत्तररामचरित भी आश्रित है। कुन्दमाला के छहों अङ्कों का दृश्यविधान वाल्मीकि-तपोवन के परिसर में ही केन्द्रित है। प्रस्तुत नाटकांश पञ्चम अङ्क से सम्पादित कर सङ्कलित किया गया है। लव और कुश से मिलने पर राम के हृदय में उनसे आलिंगन की लालसा होती है। उनके स्पर्शसुख से अभिभूत हो राम, उन्हें अपने सिंहासन पर, अपनी गोद में बिठाकर लाड़ करते हैं। इसी भाव की पुष्टि में नाटक में यह श्लोक उद्धत है-

भवति शिशुजनो वयोऽनुरोधाद् गुणमहतामपि लालनीय एव।
व्रजति हिमकरोऽपि बालभावात् पशुपति-मस्तक-केतकच्छदत्वम्।।

शिशुस्नेहसमभावश्लोकाः
अनेन कस्यापि कुलाकुरेण स्पृष्टस्य गात्रेषु सुख ममैवम्।
का निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमकात् कृतिनः प्ररूढः।। (कालिदासः)

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते।। (भवभूतिः)

धूलीधूसरतनवः क्रीडाराज्ये स्वके च रममाणाः।
कृतमुखवाद्यविकाराः क्रीडन्ति सुनिर्भर बालाः।। (अज्ञातकविः)

अनियतरुदित स्मित विराजत् कतिपयकोमलदन्तकुड्मलाग्रम्।
वदनकमलकं शिशोः स्मरामि स्खलदसमञ्जसमजुजल्पितं ते।। (अज्ञातकविः)